# भाषा एवं गीर्वाणभारती

**डॉ. नारायणपतिः**
**एस.एन.कोलेज,कर्णावती**

नास्त्यत्र अणोरणीयानपि संशीतिलेशो यन्निः शेषविश्वस्पन्दनानामाद्या शक्तिरिव इयं भगवती सुरभारती समस्तवाङ्मयस्य आधारभूता विराजते । निश्चयेनेयं हि यावत्प्रचलितभाषमाणासु समस्तासु भाषासु प्रशस्तमा, महनीयमहिमा, माधुर्यपरमसीमा,स्वर-वर्ण संस्कृति-संस्कृता, ललितललिता, विश्वजनीना जननीव सर्वभाषाजननी वर्तते । अत एवैषा संस्कृतभाषा प्राचीनेऽनेहसि चिरकालं यावल्लोक भाषासनं समासीना आसीत् । आद्रिका लिकभाषानुसन्धानावसरे भाषाशास्त्रिणां दृष्टिः सर्वप्रथमं वैदिकीं भाषामेव स्पृशति । इयं च वैदिकी ब्राह्मीभाषा यदा लोकव्यवहारेण संस्कृता सती जनसाधारण-व्यवहारमु पागतातदा अस्या नाम संस्कृतत्वात् संस्कृतम् इत्येव लोकेषु प्रसिद्धं जातम् । तदत्र कविना दण्डिना-यदुक्तं न तदनध्यक्षं शास्त्रप्रसारजुषां केषाम् अपि विदुषाम् । 'संस्कृत नाम दैवी वागन्वाख्याता महर्षिभिः,' इति ।

**यास्कः**-

महर्षेर्यास्कस्य समयो विक्रमात् ६०० वर्षपूर्वं मन्यते । असौ हि स्वलिखिते निरुक्तग्रन्थे संस्कृतभाषां लोकभाषामसाधयत् । पूर्वं विभिन्नेषु प्रान्तेषु संस्कृता शब्दा विभिन्नैः प्रकारैर्व्यवह्रियन्ते स्मेति स्पष्टमुट्टङ्कितवानसावाचार्यः यथा-शवतिर्गतिकर्मा कम्बो जेस्वव भाष्यते..विकारमस्य आर्येषु भाषन्ते शव इति ।।

**'दातिलवनार्थे प्राच्येषु, दात्रमुदीच्येषु'** ।[२]

अर्थात् गत्यर्थकोऽयं धातुः काबुलादिम्लेच्छप्रदेशेषु एव प्रकृत्या प्रयुज्यते शवति गच्छतीत्यर्थं परन्त्वार्येषु प्रदेशेष्वस्यैव शक्तेर्विकारं लोकाः शव इति वदन्ति । एवमेव दातिर्धातुराख्यातस्थो इवनार्थे प्रयुज्यते यथा -तण्डुलान् दाति, यवान् दातीत्यादि । किन्तु अयमेव नामी भूतो धातुरूदीच्येषु हरद्वार-देहरादूनादिषु दात्रम् इति प्रयुज्यते ।

एतदतिरिक्तं यास्काचार्येण लोकव्यवहारे प्रचलिता वागेव भाषाशब्देन व्यवह्रता । यथा-भाषाया मन्वध्याय च इति ।

---

**(निरुक्तम् नैगमकाण्डम् -२ /२)**

**(निरुक्तम् नै.का.२/२**

एतेन सुनिरूपितं भवति यद् यास्ककाले संस्कृतभाषा व्यावहारिकी भाषा अवर्तत ।

पाणिनिः

विक्रमात् पञ्चशतवर्षपूर्वं वर्तमानस्य मुनेः पाणिनेः समयेऽपि संस्कृतभाषा सर्वत्र लोकभाषापदम व्यारूढा अविद्यत । यतः पाणिनिरपि यास्क अपि शब्दानां तानि रूपान्तराणि प्रादर्शयत् यानि विभिन्नप्रान्तीया जना विभिन्नप्रकारेण व्यवहरेन्ति स्म, अथवा विभिन्ने समाजे विभिन्नेव प्रकारेण लेका उच्चारयन्ति स्म ।

सहैव पाणिनिः संस्कृतभाषाया ईदृग्विधान् आभाणकादीन्ः, अपि प्रादर्कायत् येषां भाषायां प्रयोगः केवलं संस्कृतभाषायाः सर्वसाधारण-व्यवहारभाषासत्त्वे एव कर्त्तुं शक्यते स्म । यथा-जहिस्तम्बोडयम् हस्ताहस्ति, दण्डादण्डि, केशाकेशि, उदरपूरं भुङ्क्ते इत्यादि ।

न केवलमेतावन्मात्रमेव, अपितु पाणिनिस्तु दूराद्धूते च इत्यादि-सूत्रेण दूराह्वाने अभिवादनोत्तरं वाडडशीर्वेदिप्रदाने प्रश्नप्रतिवचते चेत्यादि स्वर-सन्धानविषयेष्वपि प्लुतत्त्वादि-विधानमभिधाय प्रचलितव्यवहार जातमुलिललेख । इमे नियमा ईदृशाः सन्ति ये देवगिरः दैनिकव्यवहारभाषामेव प्रमाणयन्ति ।

**कात्यायन-पतञ्जली-**

वार्त्तिककरः कात्यायनो विक्रमाच्चतुः शतवर्षपूर्वकालिकः कथ्यते , महाभाष्यभाषकः पतञ्जलिश्च विक्रमात शतद्वयवर्षपूर्वसामयिकः समाभिधीयते । कात्यायतका लेऽपि देवाभाषा जनभाषा आसीत्। अत एव सः यश्च व्यवहारे प्राचलंस्तेषां सर्वेषां कृते स वात्तिकं लेखं लेखं तद्व्यवस्थामकार्षीत् । यथा-पाणिनेः समये अरण्यानी अत्यस्य प्रयोगं लोकाः स्त्रीलिंङ्गकल्पना यामेव कुर्वन्ति स्म, किन्तु कात्यायन-काले सोऽयं शब्दः महद् अरण्यंस्यार्थेऽपि प्रचलितो जातः । एतमेव सर्वेलोकाः पाणिनेरनेहसि-यवनानी शब्दं यवतस्त्रियाः कृते एव प्रयुञ्जते स्म, परन्तु कात्यायनस्य कालेऽसौ शब्दः लिपेः अर्थे व्यवहारमागच्छत।

महर्षिः पतञ्जलिरपि संस्कृतशब्दानां तानि रूपाणि प्रादर्शयद् यानि प्रान्तीय-रूपान्तरेषु व्यवहृतानि भवन्ति स्म । पाणिनेः सूत्रस्य (२/५/५६) पातञ्जलमहाभाष्ये नन्वेकस्य वैयाकरणस्य च सुन्दरं कथोपकथनं प्राप्यते, येन स्पष्टं भवति यत् तस्मिन्नपि समये संस्कृतभाषा व्यावहारिकी भाषाऽऽसीत् । यां भाषां खलु सारथि-सदृशा अपि साधारणजना । व्यवहरेयुस्तस्याः प्रकारविशेषमपि चावबोधयेयुः ,

कथं न तया तदा जनसाधारणभाषया अभूयतेति स्वस्थहृद्भिर्विद्वद्भिः स्वयमेव चिन्तनीयम् ।

अनुसन्धनीयोऽयं विषयः यत् बहुषु स्थलेषु समयेषु च बहुनि प्रमाणानि सन्ति यत् संस्कृत भाषा व्यावहारिकभाषा आसीत् एव ।

यथा--

१. महाराजो विक्रमः अस्य समये ।
२. महाराजभोजस्य समये ।
३. बौद्धानां समये ।
४. शिलालेखे ।
५. नाटकेषु ।
६. पाश्चात्त्यानां मतानुसारम् ।

विपश्चिदपिश्चिमाः पाश्चात्त्या अपि संस्कृतभाषां लोकभाषाममन्यन्तेति मन्यामहे । ग्रियर्सन-कीथ प्रभृतयः सुधिमः पर्याप्तरूपेण स्थाने स्थाने विषयोस्मिन्नलेखिषुरित्यपि न तिरोहितं तद्विदाम् । डॉ. राप्सनमहादयस्य कथनमस्ति यद् अस्माकमाङ्ग्लानाम् अंग्रेजीभाषा एव भारते तत्रत्यानां संस्कृतभाषा लोकभाषाऽऽसीत्।

किमन्यत् । लोकभाषात्वकारणादेवैषा भाषा सिंहल-चम्पा-जावा-सुमात्रा-बोर्निओ-फिलपाउन-चीन-तिब्बत जापानप्रभृति-देशेष्वपि गतालोकानां गतागतकारणात् । यत्राद्यापि अस्याः प्रभावः तत्तद्भाषायां संस्कृतौ चोपलभ्यते ।

इत्येवमादिभिरनल्पैः प्रमाणैरनेकाभिर्युक्तिभिश्चेदमेव सिद्धयति यद्विशालभारते पूर्वं चिरकालं यावत् संस्कृतभाषा लोकभाषाऽऽसतमासीनाऽवर्त्तते । साम्प्रतमस्यां ते ते सर्व एव गुणा वेविद्यन्ते ये ये लोकभाषात्व कृते समपेतिताः सन्तीति शम् ।

**।। जयतु संस्कृतम् जयतु भारतम् ।।**